International Journal of Sanskrit Research 2020; 6(4): 81-85

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(4): 81-85
© 2020 IJSR
www.anantaajournal.com
Received: 13-05-2020
Accepted: 15-06-2020

**Nitai Pal**
Assistant Professor of Nabadwip Vidyasagar College, Nadia, West Bengal, India

**Corresponding Author:**
**Nitai Pal**
Assistant Professor of Nabadwip Vidyasagar College, Nadia, West Bengal, India

# दर्शनशास्त्रे औपचारिकप्रयोगानामेकं समीक्षात्मकपर्यालोचनम्

**Nitai Pal**

**सारांँश**
यस्मिन् यो धर्मो नास्ति तत्र तद्धर्मस्यारोप उपचारशब्देन कथ्यते। दर्शनशास्त्रेष्वपि उपचारशब्दस्य तस्मिन्नेव अर्थे प्रयोगः परिलक्ष्यते। दर्शनशास्त्रे प्रधानतया चार्वाकदर्शने, न्यायदर्शने, वैशेषिकदर्शने, सांख्यदर्शने, योगदर्शने, वेदान्तदर्शने चैतादृश औपचारिकः प्रयोग उपलभ्यते। तेषाम् औपचारिकप्रयोगानां यथामति संकलनंशोधप्रबन्धेऽस्मिन् वर्तते। अर्थात् औपचारिकप्रयोगात्मकं संकलनं तेषां पर्यालोचनञ्च अस्य शोधपत्रस्य विषयः। अस्मिन् शोधप्रबन्धे पाठकानां प्रवृत्तिः कथं जायते इति जिज्ञासायामुच्यते येषां पाठकानाम् औपचारिकप्रयोगविषये ज्ञानमाहर्तुमिच्छा वर्तते, ते स्वल्पायासेन अस्मात् शोधपत्रात् उपचारविषयकं ज्ञानं प्राप्तुं शक्नुवन्ति।

**शब्दसंकेतानि** - चार्वाकदर्शनस्य देहात्मवादे औपचारिकप्रयोगः, न्यायदर्शनस्य औपचारिकप्रयोगः, सांख्यदर्शनस्य औपचारिकप्रयोगः, योगदर्शनस्य औपचारिकप्रयोगः, वेदान्तदर्शनस्य औपचारिकप्रयोगः।

**ऊपोद्घातः-** यस्मिन् यो धर्मो नास्ति, तत्र तद्धर्मस्य कल्पना उपचार आरोपः वा कथ्यते । यथा “चन्द्रइवमुखम्” इत्यत्रप्रकृतविषयः मुखम्, तत्र सादृश्यवशात् मुखे चन्द्र आरोप्यते। शास्त्रे सर्वत्र अस्य उपचारस्य प्रयोजनीयता दरीदृश्यते। यथा अलङ्कारशास्त्रे व्याकरणशास्त्रे दर्शनशास्त्रे च। चार्वाकदर्शनस्य देहात्म्यवादे आरोपतत्त्वं परिलक्ष्यते, मम शरीरम् इति व्यवहारे। वस्तुतः मम शरीरमित्यत्र मम इत्यस्य स्थाने अहमित्येवं करणीयम्। किन्तु तत्र औपचारिकत्वात् मम इत्येवं व्यवहारः दृश्यते। जैनदर्शने आत्मनः निरवयवत्वं निर्णितम्, तत्रापि आत्मनः देहसंयुक्तरूपेण व्यवहारो परिलक्ष्यते। देहस्य सावयवत्वमात्मनि गौणरूपेण औपचारिकरूपेण वा प्रयुज्यते। अतः देहस्य सावयवत्वमात्मनि आरोपितम्। सांख्यदर्शने प्रकृतेः बन्धनमुक्तयोः वर्णनायाम् आरोपतत्त्वस्योल्लेखो दृश्यते। तथा च-

> “तस्मान्न बध्यतेऽद्धा न मुच्यते नाऽपि संसरति कश्चित्।
> संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः॥”६२॥ सा. कौ

योगदर्शनशास्त्रे अपि अनेन प्रकारेण आरोपतत्त्वं समुपलभ्यते। यथा अविद्यायामारोपतत्त्वम् योगसूत्रकारेण पतञ्जलिना योगसूत्रस्य साधनपादे अविद्यायाः स्वरूपं निर्णितम्-

"अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या॥"५

न्यायदर्शनस्य द्वितीयखण्डे "अतद्भावेऽपि तदुपचार" इत्यस्य वाक्यस्य व्याख्यायामारोप दृश्यते। पूर्वस्मिन् सूत्रे पदार्थस्य स्वरूपविषये संशय उत्पद्यते। अतः व्यक्तिः यदि पदार्थः न भवति, तर्हि व्यक्तौ उपचारस्य प्रयोगः परिलक्षितः। वस्तुतः निमित्तत्वात् यद्यपि तद्भावः न विद्यते, तथापि तदुपचारस्य प्रयोगः परिलक्षितः। वेदान्तदिशा अध्यारोपस्य स्वरूपपर्यालोचनायामारोपस्य प्रोयोगः दृश्यते "असर्पभूतायां रज्जौ सर्पारोपवत् वस्तुनि अवस्त्वारोप अध्यारोपः।"

**प्रधानविषयः -** चार्वाकपादैः देहात्मवादः स्वीकृतः। देहात्मवादे चैतन्यविशिष्टदेह आत्मा इति उच्यते। देहातिरिक्तात्मा नास्ति। देहात्मवादीनां चार्वाकानां नये यदि देहातिरिक्तस्य आत्मनः अस्तित्वं स्वीकृयते तर्हि अवश्यमेव स्वीकरणीयं यत् मरणकाले आत्मा देहात् वहिर्गच्छति। किन्तु मृत्युशय्यास्थितस्य जनस्य समीपे ये आत्मीयाः जनाः तिष्ठन्ति ते कदापि आत्मापदवाच्यं मूर्तपदार्थं शरीरात् वहिर्गन्तुं न पश्यन्ति। अतः आत्मा मूर्तपदार्थः न भवति। आत्मा यदि अमूर्तपदार्थरूपेण दृश्यते तत्र एव "अहं स्थूलः", "अहं कृशः, च इत्येवं व्यवहारः निरालम्बरूपेण प्रतीयते। तथा चेत् "अहं स्थूलः, अहं कृशः" इत्यादिव्यवहारेषु देहसामानाधिकरण्यवशतः शरीरमेव आत्मा इत्यर्थप्रतीतिः स्यात्। देहात्मवादे दर्शनाङ्कुरटीकायामाटीकृतम् "देहातिरिक्तस्य आत्मनोऽङ्गीकारेतु मरणसमये देहाद्वहिर्गच्छतस्तस्यादर्शनेने तस्यामूर्त्तत्वाङ्गीकारावश्यम्भावेन तत्र कृशत्वस्य कृष्णादिरूपस्य च असम्भवादहम्पदवाच्यात्मनः कृशकृष्णादिपदैः सामानाधिकरण्यं कृशोऽहं कृष्णोऽहमित्येवं लोकप्रसिद्धिः न सम्भवति इत्यर्थः"। अधुना एकः प्रश्न उपस्थितः यदि शरीरमात्मा च अभिन्नं भवतः तर्हि शरीरमेव अहम्पदवाच्यत्वेन कथं न प्रचलितम्? मम शरीरमित्यस्य स्थाने सामानाधिकरण्यतः अहं शरीरम् इत्येव व्यवहारः कथं न क्रियेत? तत्र जिज्ञासां निवारयितुं चार्वाकैः मन्यते यथा लोके राहुः मस्तकश्चाभिन्नरूपेण दृश्यते तथापि क्रियते राहोः शिर इत्येवं औपचारिकप्रयोगः। मम शरीरम् इत्यत्र तद्वदेव व्यवहारः। अर्थात् यद्यपि राहुः मस्तकश्चाभिन्नं भवति तथापि जनाः औपचारिकभेदं स्वीकृत्य "राहोः शिरः" इत्येवं प्रयोगं कुर्वन्ति। यद्यपि देहः आत्मा च अभिन्नरूपेण प्रतीयेते तथापि 'मम शरीरम्" इत्येवं औपचारिकव्यवहारः न उपयुज्यते। अत्र स्पष्टतया प्रतीयते यत् यद्यपि अत्र शरीरम् आत्मा च अभिन्नरूपेण दृश्यते तथापि तत्र ममपदवाच्यस्य आरोपः जायते। माधवाचार्येणापिसर्वदर्शनसंग्रहे गदितम् –

"देहः स्थौल्यादियोगाच्च स एवात्मा न चापरः।
"मम देहोऽयमित्युक्तिः सम्भवेदौपचारिकी ॥" इति स. द.

- **अतद्भावेऽपि तदुपचार इत्यत्र आरोपतत्त्वम्**

न्यायदर्शनस्य द्वितीयखण्डे "अतद्भावेऽपि तदुपचार" इत्यस्य वाक्यस्य व्याख्यायामारोप दृश्यते। पूर्वस्मिन् सूत्रे पदार्थस्य स्वरूपविषये संशय उत्पद्यते। अतः व्यक्तिः यदि पदार्थः न भवति, तर्हि व्यक्तौ उपचारस्य प्रयोगः परिलक्ष्यते। वस्तुतः निमित्तत्वात् यद्यपि तद्भावः न विद्यते, तथापि तदुपचारस्य प्रयोगः परिलक्ष्यते। अतः महर्षिगौतमपादैः सूत्रितम्

"सहचरण-स्थान-तादर्थ्य-वृत्त-मान-धारण-सामीप्य-योग-साधनाधिपत्येभ्योः ब्राह्मण-मञ्च-कट-राज-सक्तु-चन्दन-गङ्गा-शाटकान्न-पुरुषेष्वु-तद्भावेऽपि तदुपचारः॥" [1]

व्यक्तिः पदार्थः न इति पूर्वसूत्रे सूत्रकारेण सूचितम्। अस्य प्रश्नस्य उत्तरमुपस्थापितं भाष्यकारेण "अतद्भावेऽपि तदुपचारः" इति। अत्र निमित्तविशेषकथनमेव उपचार इति मन्यते। उपचारशब्दस्यार्थ आरोपः। भाष्यकारेणापि गौ इत्यस्य पदस्य गोपदार्थे उपचारं समर्थयितुम् "दृश्यते खलु" इति उक्त्वा सूत्रोक्तस्य उपचारस्य व्याख्यां कृत्वा सहचरणादिनिमित्तत उपचारस्य प्रदर्शनं कृतम्। अत्र हेत्वर्थे खलु इति शब्दः प्रयुक्तः। सूत्रस्थितेन सहचरणपदेन नियतसम्बन्धः बोध्यः। "योष्टिकां भोजयेत्" इत्यस्मिन् प्रयोगे यष्टिकाशब्देन यष्टिकासहचरितः ब्राह्मणः बोध्यते इत्येवं प्रयोगः निमित्ततः सम्भवति। अत्र यष्टिकाशब्दे लक्ष्यार्थः गृह्यते। अत्र यष्टिकाशब्दे यष्टिकासहचरितस्य ब्राह्मणस्य आरोप उपपद्यते। अनेन प्रकारेण अन्यत्रापि समुपलभ्यते, "मञ्चाः क्रोशन्ति" इत्यस्मिन् वाक्ये मञ्चशब्देन मञ्चस्थाः पुरुषाः बोध्यन्ते। अत्र मञ्चशब्दे मञ्चस्थपुरुषाणामुपचार उपपद्यते। तादर्थ्यात् कटार्थेषु वीरणेषु व्युहमानेषु कटं करोतीति भवति। तस्मिन् काले कटः निर्वर्त्त्यं कर्मकारकं भवति। किन्तु तदा कटस्य निर्माणं सम्पूर्णरूपेण न जायते। अतः कटः क्रियायाः निमित्तं न भवति। अतः अस्य कर्मत्वमपि न उपपद्यते। कटार्थं वीरणमेव तादर्थत्वात् कटः भवति इति बोधनीयम्। वृत्तरूपतः यः नृपः यमवदाचरति स यमः भवति। समानैव य कुवेरवदाचरति स कुवेरः भवति। अत्र यमनृपयो अभेदारोपः समुपलभ्यते। अन्यत्रापि कुवेरनृपयोः अभेदारोपः समुपलभ्यते। मानात् आढकेन मिताः सक्तव आढकसक्तव इति मन्यते। अतः परिमाणरूपनिमित्ततः सुक्तिकादौ आढकस्य प्रयोग उपपद्यते। धारणतः तुलायां धृतं चन्दनं तुलाचन्दनमिति समुपलभ्यते। सामीप्यतः गङ्गायां गावश्चरन्ति इत्यत्र गङ्गाशब्दे सन्निकृष्टस्य देशविशेषस्य उपचार उपपद्यते। योगतः कृष्णेण रागेण युक्तः शाकटः कृष्ण इति उपचर्य्यते।

अतः कृष्णशब्देन यथा कृष्णवर्णस्य बोधः जायते, तथैव कृष्णवर्णविशिष्टस्यापि बोधः जायते। कृष्णवर्णविशिष्टे कृष्णशब्दस्य उपचारः जायते। साधनतः तेनैव प्रकारेण अन्नं प्राणस्य साधनम्, प्राण अन्नसाध्यरूपेण समुपलभ्यते। आधिपत्यात् अयं पुरुषः कुलम्, अयं गोत्रमिति इत्यादौ पुरुषकुलयोः पुरुषगोत्रयोश्चाभेदारोपः दृश्यते।

- सांख्यदर्शनशास्त्रस्य आरोपतत्त्वमुल्लिखितं यथा प्रकृतेः बन्धनमुक्तयोः वर्णनायामारोपतत्त्वम्

"तस्मान्न बध्यतेऽद्धा न मुच्यते नाऽपि संसरति कश्चित्।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः॥"६२॥ सां. कौ.

कारिका इयं सांख्यतत्त्वकौमुद्यां समुपलभ्यते। अस्यां कारिकायां सांख्यानुसारेण बन्धनमोक्षयोः विषय आलोचितः। सांख्यशास्त्रानुसारेण पुरुषस्य बन्धनं न जायते। पुरुषस्य बन्धनं नकथं जायते इत्यस्मिन् विषये वाचस्पतिमिश्रेण भण्यते "सवासनक्लेशकर्माशयनश्च बन्धनसमाख्यानां पुरुषेऽपरिणामिन्यसम्भावात्" [2] इति। अत्र वासना इति शब्देन संस्कारः बोध्यते। क्लेशशब्देनात्र अविद्यास्मितारागद्वेषाभिनिवेशाः बोध्यन्ते। कर्मशब्देन धर्माधर्मयोः बोधः जायते। अत्र संस्कारेण सह क्लेशकर्माशयः बन्धनरूपेण बोध्यन्ते। अनेन प्रकारेण पुरुषस्य बन्धनं कदापि न सम्भवति। यतः पुरुषे क्लेशादिनामभावः विद्यते। अतः पुरुषस्य संसारः कदापि न सम्भवति। प्रेत्याभावशब्देन संसारः बोध्यते। सांख्यकारिकायां दृश्यते "तस्मात् न बध्यते..." इति। पुरुषस्य कदापि बन्धनं न जायते। अतः पुरुषः न संसरति। अस्मादेव कारणात् पुरुषस्य मुक्तिरपि नास्ति। पुरुषस्य मुक्तये प्रकृतेर्प्रवृत्तिः जायते इति वक्तव्यमौपचारिकम्। औपचारिकशब्दः अत्र पारिभाषिकत्वेन व्यवहृतः। अतः पुरुषस्य यथा बन्धनं नास्ति तथा तस्य मुक्तिरपि नास्ति। वस्तुतः प्रकृतिः पुरुषेण सह सम्बन्धतः प्रकृतिः संसरति, प्रकृतेः मुक्तिः सम्भवति। अतः बन्धनमोक्षसंसाराणां सम्बन्धः प्रकृत्या सह न तु पुरुषेण सह। गुणत्रयस्य परिणामरूपेण बन्धनादयः समुपलभ्यन्ते। बन्धनादयः प्रकृतिसन्निहितपुरुषे आरोप्यन्ते। तस्माद् बन्धनादयः पुरुषेण सह सम्बध्यन्ते। वस्तुतः प्रकृतिपुरुषयोः विवेकज्ञानाभावात् प्रकृतिगतबन्धनादयः पुरुषैः स्वस्य मन्यन्ते। यथा जयपराजयौ भृत्यगतावपि स्वामिन्युपचर्यन्ते, तदाश्रयेण भृत्यानान्तभागित्वात्, तत्फलस्य च शोकोलाभादेः स्वामिनि सम्भावात्। योगदर्शनशास्त्रे अपि अनेन प्रकारेण आरोपतत्त्वं समुपलभ्यते यथा अविद्यायामारोपतत्त्वम्

- योगसूत्रकारेण पतञ्जलिना योगसूत्रस्य साधनपादे अविद्यायाः स्वरूपं निर्णितम्

"अनित्याशुचिदुःखानात्मसु
नित्यशुचिसुखात्मख्यातिरविद्या॥"५

अनित्ये नित्यज्ञानम्, अशुचौ शुचिज्ञानम्, दुःखजनके सुखज्ञानम्, अनात्मवस्तुनि च आत्मज्ञानम् अविद्यया समुत्पद्यन्ते। अविद्या शब्दस्यार्थः विद्यायाः अभावः। अतः अविद्या नाम मिथ्याज्ञानम्। यद्वस्तुनि यो धर्मो नास्ति तत्र तद्धर्मस्य ज्ञानं मिथ्याज्ञानम्, यथा अनित्ये घटे नित्यज्ञानम्। वात्सायनभाष्ये अपि लक्ष्यते-

"स्थानाद्बीजादुपष्टम्भात् निष्यन्दान्निधनादपि।
कायमाधेयशौचत्वात् पण्डिता हि अशुचिं विदुः॥" [3]

अत्र अशुचौ शुचिख्यातिर्दृश्यते। "नवेवा शशाङ्कलेखा कमनियेयं कन्या मध्वमृतावयवनिर्मितेव चन्द्रं भित्वा निःसृतेव ज्ञायते," इति अस्योदाहरणं तेन प्रदर्शितं व्यासभाष्ये। अनेन प्रकारेण दुःखे सुखख्यातिः दृश्यते। परिणामतापसंस्कारदुःखैः गुणवृत्तिविरोधाच्च सर्वं दुःखमेव इति मतम्। अत्र दुःखे सुखज्ञानमविद्या। वाह्योपकरणेषु चेतनाचेतनेषु शरीरे मनसि इति एतेषामनात्मनि आत्मख्यातिः अविद्यातः जायते। व्यासभाष्ये अपि दृश्यते "व्यक्तमव्यक्तं वा सत्त्वमात्मत्वेनाभिप्रतीत्य तस्य सम्पदमनुनन्दति आत्मसम्पदं मन्वानः, तस्य व्यापदमनुशोचति आत्मव्यापदं मन्यमानः स सर्वोऽप्रतिबुद्धः"[4] इति। अर्थात् यो जनः व्यक्तमव्यक्तं चेतनाचेतनं सत्त्वं आत्मनः विचिन्त्य पुनः पुनः आनन्दमनुभवन्ति ते जनाः मूढाः इति मन्यन्ते। एषा चतुष्पदा भवति अविद्या। अस्य मूलं क्लेशप्रवाहस्य सविपाकस्य कर्माशयः भवति। अनेन अविद्या न प्रमाणं न वा प्रमाणभावः इति बोध्यम्। किन्तु अविद्या विद्याविपरीतं ज्ञानान्तरमिति स्वीकर्तव्यम्। अतः भ्रमज्ञानतः अनित्यादौ यथाक्रमं विद्यादीनामारोपः जायते। वेदान्तसारे अनुबन्धचतुष्टयस्य प्रमेयस्यालोचनायामारोपतत्त्वं वेदान्तदिशा समुपस्थापितम्। तत्र प्रमेयस्य लक्षणं लक्षितम् "जीवब्रह्मैक्यं शुद्धचैतन्यं प्रमेयं, तत्र एव वेदान्तानां तात्पर्यात्।"[5] अस्मिन् विषये सुबोद्धिनी इति टीकायां गदितम्
"अविद्यारोपितसर्वज्ञत्वकिञ्चिज्ज्ञत्वादिविरूद्धधर्मपरित्यागे नाविशिष्टं शुद्धं चैतन्यं ज्ञेयस्वरूपमेव सर्वेषां वेदान्तवाक्यानां विषयः।"[6] सर्वव्यापकं चैतन्यमेव अनवच्छिन्नरूपेण ब्रह्म, अवच्छिन्नरूपेण जीव इति

अभिधीयते। जीवब्रह्मैक्यमज्ञानजन्यरूपेण दृश्यते। यावत् जीवब्रह्मैक्यं वर्तते तावदेव जीवः जननमरणशीलरूपेण दृश्यते। अत्राविद्यारोपितसर्वज्ञत्वमित्यत्र जीवे अविद्याया आरोपः दृश्यते। आरोपस्य स्वरूपानुसारं ब्रह्मपदार्थः सत्यरूपेण दृश्यते किन्तु तत्र अविद्याया आरोपत्वात्जगत् सत्यरूपेण अनुभूयते। शास्त्रे अध्यारोपापवादन्यायेन ब्रह्मतत्त्वमुपदिष्टं दृश्यते। ततः अध्यारोपस्य स्वरूपं वेदान्तदिशा निर्णितम् "असर्पभूतायां रज्जौ सर्पारोपवत् वस्तुनि अवस्त्वारोप अध्यारोपः।" इति। अर्थात् रज्जौ सर्पारोपवत् वस्तुनि अवस्त्वारोप अध्यारोपः। अत्र पूर्वदृष्टस्य वस्तुनः अनुभावात् संस्कारः जायते। संस्कारात् उत्पन्नज्ञानस्य सदृशज्ञानमध्यारोप इति पण्डितैः मन्यते। यथारज्जुः न सर्पः, किन्तु रज्जौ सर्पस्यारोपः अध्यारोपः। रज्जुसर्पयोः विवेकाभावः अस्य अध्यासस्य कारणम्। अतः अध्यासो नाम खल्वेष वस्तुनः योऽन्यथाग्रहः। अत्र ज्ञातव्यमस्ति यत्, रज्जौ यः सर्पः आरोप्यते,तस्य सर्पस्य बोधः देशन्तरीयसर्परूपेण अथवा तत्कालीनसर्परूपेण कथं वा जायते इति प्रश्नः समुदेति? अत्र अद्वैताचार्यैः सह अन्येषांदार्शनिकानां मतवैषम्यं दृश्यते। पूर्वदृष्टस्य सर्पस्य संस्कारः सादृश्यवशाद् उद्भासितो भवति। तदा नेत्रगतदोषतः देशन्तरीयसर्पः रज्जौ आरोप्यते। अद्वैतवादीनां नये रज्जौ सर्पभ्रमकाले रज्जुसर्पौ तत्कालावच्छिन्ननवीनसर्परूपेण दृश्यते। रज्ज्वा सह सर्पस्य प्रमेयगतदोषादीनां सादृश्यं वर्तते। ततः प्रमातृगतदोषेण बल्मिकादौ पूर्वानुभूतस्य सर्पस्य संस्कार उद्बोधकरूपेण जायते। प्रमातृचैतन्यं रज्ज्ववच्छिन्नचैतन्यञ्चाभिन्नरूपेण दृश्यते। तदाश्रिता अविद्या संस्कारेण सहकारिकारणेन वा सर्पादिरूपेणप्रतिभास्यते। ततः अयं सर्प इत्येवं ज्ञानं भवति। वेदान्तसारस्य सदानन्दयोगीन्द्राचार्येण सुबोधिनीटीकायां कथ्यते "व्यवहारिकवस्तुत्वेनाभिमतायां रज्जौ, अवस्तुभूतसर्पारोपो नाम रज्ज्ववच्छिन्नचैतन्यवस्था अविद्या सर्पज्ञानाभासकारेण परिणममाना, सर्पाकारेण विवर्त्तते....।" [7] अत्र आरोपस्य स्वरूपं स्पष्टरूपेण प्रतिपाद्यते। अस्मिन् विषये वेदान्तदर्शनस्य शाङ्करभाष्ये दृश्यते "तथापि अन्योन्यस्मिन् अन्योन्यात्मकताम् अन्योन्यधर्माश्च अध्यासस्य इतरेतराविवेकेन अत्यन्तविविक्तयोः धर्मधर्मिणोः मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्य, "अहम् इदम्" "मम इदम्" इति नैसर्गिकः अयं लोकव्यवहारः।" [8]

## उपसंहृतिः–

अत्र प्रबन्धे समासेन शास्त्रेषु उपचारविषयात्मकानां तथ्यानां संकलनं विहितम्। अत्रैव अस्य पत्रस्य मौलिकत्वम्। यतः उपचारविषकमालोचनं भिन्नेषु दर्शनेषु भिन्नभिन्नरूपेण वर्तते। केन प्रकारेण लौकिकजीवनयात्रायां वाङ्माधुर्ये आरोपस्य प्रासङ्गिकता अस्ति? एकस्मिन् वस्तुनि भिन्नवस्तुनः कल्पना हि आरोपः। आरोपमवलम्ब्य काव्यादिशास्त्रेषु लक्षणादीनां व्यवहारः उपपद्यते। येन काव्यं लोकोत्तरत्वं चमत्कारित्वञ्च भवति। तत्रोच्यते यदि वाक्यव्यवहारे लक्षणायाः व्यञ्जनायाः व्यवहारः क्रियते तर्हि वाक्यव्यवहारस्य चमत्कारित्वमुपजायते। अर्थात् प्रत्यक्ष्यतया लक्षणादिवृत्त्या वाक्येन काव्यस्य चमत्कारित्वं जन्यते, परोक्षरूपेण अनया एव वाक्यव्यवहारस्यापि चमत्कारित्वं समुपलभ्यते। यथा लोके "छत्रिणः गच्छन्ति" इत्युक्ते छत्रधारिणः गच्छन्ति इति बोधो जायते। वस्तुतः शास्त्रदृष्ट्या विचारं कुर्मश्चेत् "छत्रिणः गच्छन्ति" इत्यस्य वाक्यस्य अर्थद्वयं विद्यते। प्रथामतया शब्दस्य स्वभाविक्या अभिधावृत्त्या छत्रिणः गमनं कुर्वन्ति इत्यर्थप्रतीतिः भवति। किन्तु कृतिः सचतने दृश्यते। अचेतने छत्रे प्रयत्नाभावात् अन्वयानुपत्त्या लक्षणया मुख्यार्थबाधमुत्पाद्य मुख्यार्थसहितोऽर्थः चिन्तनीयः। तथाहि वाक्यस्य लक्षणया छत्रधारिणः जनाः गमनं कुर्वन्ति इत्येवं अर्थः जायते। अत्र वाक्यव्यवहारे चमत्कारित्वमपि दृश्यते। प्रथमतया अभिधया यद्यपि छत्रिणः शब्दस्यार्थः छत्रिणरूपेण बोध्यते तथापि तत्र छत्रे छत्रधारिणो बोध आरोपसहायेन सम्भवति। अर्थात् अत्र छत्रे छत्रधारिणः पुरुषस्य आरोपः जायते। तेन वाक्यव्यवहारस्य चमतकारित्वमपि सम्भवति। तेनैव प्रकारेण "गङ्गायां घोषः" इत्यादिष्वपि आरोपस्य व्यवहारः दृश्यते।

## तथ्यसूत्राणि


1. फणिभूषण तर्कवागीश (सम्पा.), महर्षिगौतमप्रणित न्यायदर्शन् (द्वितीयखण्ड), पश्चिमवङ्ग राज्य पुस्तक पर्षद्, कोलकाता- १३. २०११, पृ- ४०३
2. श्री नारायण चन्द्र गोस्वामी (सम्पा.), श्रीमदीश्वरकृष्णकृता संख्यकारिका श्रीमद्वाचस्पतिमिश्रविरचिता सांख्यतत्त्वकौमुदी, संस्कृत पुस्तह भाण्डार, कलिकाता- ००६, १४०६, पृ- ३४५
3. "स्थानाद्दी........", व्यासभास्य, स्वामी भर्गानन्द(सम्पा.),पातञ्जलयोग दर्शनम्, उद्बोधन कार्यालय, कोलकाता -००३,२०१६, पृ - ८९
4. "व्यक्तम्.......", व्यासभास्य, स्वामी भर्गानन्द(सम्पा.),पातञ्जलयोग दर्शनम्, उद्बोधन कार्यालय, कोलकाता -००३,२०१६, पृ - ९०
5. विपद भन्जन पाल (सम्पा.), सदानन्दयोगीन्द्रसरस्वतीप्रणीतः वेदान्तसारः, संस्कृत पुस्तक भाण्डार, कलोकाता- ००६, १४१९, पृ- ५५
6. विपद भन्जन पाल (सम्पा.), सदानन्दयोगीन्द्रसरस्वतीप्रणीतः वेदान्तसारः, संस्कृत पुस्तक भाण्डार, कलोकाता- ००६, १४१९, पृ- ५६

7. विपद भन्जन पाल (सम्पा.), सदानन्दयोगीन्द्रसरस्वतीप्रणीतः वेदान्तसारः, संस्कृत पुस्तक भाण्डार, कलोकाता- ००६, १४१९, पृ- ५५
8. स्वामी चिद्घनानन्द ओ वेदान्तवागीश श्री आनन्द झा (सम्पा.), वेदान्तदर्शनम्, उद्बोधन कार्यालय, कलकाता- ०३०, २०१६, पृ -२३

**ग्रन्थपञ्जिकाः**


1. श्रीमद्वाचस्पतिमिश्र। सांख्यतत्त्वकौमुदी। सम्पा. नारायन चन्द्र गोस्वामी। कोलकाताः संस्कृत पुस्तह भाण्डार, १४०६। मुद्रण।
2. सञ्जितकुमार साधुखा। सर्वदर्शनसंग्रहे बौद्धदर्शन ओ जैनदर्शन। कोलकाताः सन्देश, २०११। मुद्रण।
3. सायण माधवाचार्य। *सर्वदर्शन संग्रह*। सम्पा. सत्यज्योति वक्रवर्ती। कोलकाताः साहित्यश्री, १४१४। मुद्रण।
4. सायनमाधवाचार्य। सर्वदर्शनसंग्रह। सम्पा. अमित भट्टाचार्य। कोलकाताः संस्कृत पुस्तक भाण्डार, २०१३। मुद्रण।